नामांक Roll No.

No. of Questions – **28**

No. of Printed Pages – **8**

# VU-87-Sahit. Shas.

## साहित्य – शास्त्रम्

**वरिष्ठ उपाध्याय परीक्षा, 2021**

**समय : 3¼ होराः**

**पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः ।

(2) **सर्वे** प्रश्नाः समाधेयाः ।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि ।

(5) सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि ।

| खण्ड | प्रश्ननों की संख्या | अंक प्रत्येक प्रश्न | कुल अंक भार |
|---|---|---|---|
| खण्ड–अ (A) | 1 (i से x), 2 से 11 = 20 | 1 | 20 |
| खण्ड–ब (B) | 12 से 19 = 8 | 2 | 16 |
| खण्ड–स (C) | 20 से 23 = 4 | 4 | 16 |
| खण्ड–द (D) | 24 से 25 = 2 | 5 | 10 |
| खण्ड–य (E) | 26 से 28 = 3 | 6 | 18 |

OFFICE COPY

## खण्ड – अ (A)

1. अधोलिखितप्रश्नानाम् उत्तराणि उचित-क्रमाक्षरेण लिखत । 1 × 10 = 10

(i) बिम्ब प्रतिबिम्बत्वेऽलङ्कारो भवति ।

(अ) दृष्टान्तः
(ब) निदर्शना
(स) व्यतिरेकः
(द) विभावना

(ii) "या दातुः सौम्यता सेयं सुधांशोरकलङ्कता" इत्यत्र कोऽलङ्कारः ?

(अ) प्रतिवस्तूपमा
(ब) विनोक्तिः
(स) निदर्शना
(द) विशेषोक्तिः

(iii) विभावः भवति –

(अ) द्विविधः
(ब) त्रिविधः
(स) चतुर्विधः
(द) एकविधः

(iv) विवक्षितवाच्यध्वनिः कतिविधो भवति ?

(अ) एकविधः
(ब) त्रिविधः
(स) पञ्चविधः
(द) द्विविधः

(v) शृङ्गाररसस्य स्थायिभावः कः ?

(अ) क्रोधः
(ब) रतिः
(स) उत्साहः
(द) हासः

(vi) मेघदूतकाव्ये नायकः कः ?

(अ) इन्द्रः
(ब) कुबेरः
(स) यक्षः
(द) कालिदासः

OFFICE COPY

(vii) जललवमुच: मार्गम् के सूचयिष्यन्ति ?

(अ) मयूरा: (ब) मुकुला:

(स) सारङ्गा: (द) देवाङ्गना:

(viii) कैकेयी रामाय कति वर्षाणां वनवासम् इष्टवती ?

(अ) द्वादशवर्षाणाम् (ब) चतुर्दशवर्षाणां

(स) चतुर्दशदिनानाम् (द) चतुर्विंशतिवर्षाणाम्

(ix) महाराजदशरथस्य कति राज्ञ्य: आसन् ?

(अ) द्वे (ब) तिस्र:

(स) चतस्र: (द) एका

OFFICE COPY

(x) चन्द्रालोकानुसारं अभिधा –

(अ) षड्विधा (ब) त्रिविधा

(स) चतुर्विधा (द) द्विविधा

**एकेन वाक्येन उत्तरत –**

2. चन्द्रालोके लक्षणा कस्मिन् मयूखे वर्णिता ? 1

3. प्रतिमागृहे केषां प्रतिमा: स्थापिता: आसन् ? 1

4. चेतनाचेतनेषु प्रकृतिकृपणा: के भवन्ति ?

5. मेघदूतम् कीदृशं काव्यम् ? 1

6. मेघदूते मुख्यतया किं वर्णितम् ? 1

7. महाराजदशरथस्य मृत्योर्वर्णनं कस्मिन्नङ्के विद्यते ? 1

8. विभावनालङ्कारस्य लक्षणं लिखत । 1

**समुचितेन पदेन रिक्तस्थानानि पूरयत –**

9. व्रजतु चरतु धर्मं __________ हि नार्यः । 1

10. याच्ञा मोघा __________ नाधमे लब्धकामा । 1

11. प्रस्तुताप्रस्तुतानां च तुल्यत्वे __________ मतम् । 1

**खण्ड – ब (B)**

OFFICE COPY

12. वीररसं प्रतिपादयत । 2

13. शृङ्गाररसस्य विभावानुभावव्यभिचारिभावान् निर्दिशत । 2

14. व्यञ्जनाव्यापारस्य प्रमुखान् भेदान् लिखत । 2

15. अभिधावृत्तेः लक्षणं लिखत । 2

16. आम्रकूटस्य वैशिष्ट्यम् निरूपयत । 2

17. प्रियेषु विभ्रमः कासामाद्यं प्रणयवचनमस्ति ? 2

5

2

स्य चरित्रचित्रणं निरूपयत ।

2

ाकविभासस्य पञ्चनाटकानां नामानि लिखत ।

## खण्ड – स (C)

2 + 2 = 4

योश्चिद् **द्वयोः** रसयोः लक्षणं विवेचयत ।

करुणः, अद्भुतः, बीभत्सः

4

लक्ष्यक्रमव्यङ्ग्यध्वनिः कतिविधः ? नामोल्लेखं कुरुत ।

**अथवा**

संलक्ष्यक्रमव्यङ्ग्यध्वनिं निरूपयत ।

OFFICE COPY

4

क्षणायाः द्वादशभेदानां नामानि लिखत ।

**अथवा**

क्षणायाः लक्षणं विवेचयत ।

1 + 3 = 4

धोलिखित श्लोकयोः कस्यचिदेकस्य सप्रसंगं भावार्थः लेख्यः ।

तां चावश्यं दिवसगणनात्परामेकपत्नी

मव्यापन्नामविहतगतिर्द्रक्ष्यसि भातृजायाम् ।

आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां,

सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ।।

**अथवा**

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेलो

स्त्वत्सम्पर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः ।

यः पण्यस्त्री परिमलोद्गारिभिर्नागराणा –

मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ।।

[ Turn over

## खण्ड – द (D)

24. कयोश्चिद् **द्वयोः** गुणीभूतव्यङ्ग्ययोः लक्षणमुदाहरणं च लिखत । $2\frac{1}{2} + 2\frac{1}{2} = 5$

अपराङ्गम्, वाच्यसिद्ध्यङ्गम्, अस्फुटम् ।

25. अधोलिखितश्लोकयोः कस्यचिदेकस्य छन्दः परिचीय तल्लक्षणं लेखनीयम् । लक्षणोदाहरणयोः सङ्गविश्चप्रदर्शनीया । $2\frac{1}{2} + 2\frac{1}{2} = 5$

(क) छत्रं सव्यजनं सनन्दिपटहं भद्रासनं कल्पितं,
न्यस्ता हेममयाः सदर्भकुसुमास्तीर्थाम्बुपूर्णाः घटाः ।
युक्तः पुष्यरथश्च मन्त्रिसहिताः पौराः समभ्यागताः ।
सर्वस्यास्य हि मङ्गलं स भगवान् वेद्यां वशिष्ठः स्थितः ।।

(ख) ताते धनुर्नमयि सत्यमवेक्षमाणे,
मुञ्चानि मातरि शरं स्वधनं हरन्त्याम् ।
दोषेषु बाह्यमनुजं भरतं हनानि,
किं रोषणाय रुचिरं त्रिषु पातकेषु ।।

OFFICE COPY

## खण्ड – य (E)

26. अधोलिखितश्लोकयोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्गान्वयसहिता व्याख्या कार्या । $1 + 1 + 1 + 3 = 6$

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी,
नीत्वामासान् कनकवलयभ्रंशरिक्तः प्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं,
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।।

**अथवा**

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्तात्,
द्वल्मीकाग्रात् प्रभवति धनुः खण्डमाखण्डस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते,
बर्हेणैव स्फुरितरुचिना गोपवेषस्य विष्णोः ।।

1 + 1 + 1 + 3 = 6

निम्नलिखितयोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्गान्वयसहिता व्याख्या कार्या –

एते ते देवतानामसुरपुरवधे गच्छन्त्यभिसरी,
मेते शक्रलोके सुरजनपदा यान्ति स्वसुकृतैः ।
एते ते प्राप्नुवन्तः स्वभुजबलजितां कृत्स्नां वसुमती
मेते ते मृत्युना ये चिरमनवसिताश्छन्दं मृगयता ।।

राज्येत्वामभिषिच्य सन्नरपतेर्लाभात् कृतार्थाः प्रजाः,
कृत्वात्वत्सहजान् समानविभवान् कुर्वात्मनः सन्ततम् ।
इत्यादिश्य च ते तपोवनमितो गन्तव्यमित्येतया,
कैकेय्याहि तदन्यथा कृतमहो निःशेषमेकक्षणे ।।

OFFICE COPY

3 + 3 = 6

निम्नलिखितालङ्कारयुग्मेषु कयोश्चिद् **द्वयोः** परस्परं भेदः प्रदर्शनीयः –

(क) अप्रस्तुतप्रशंसा   अर्थान्तरन्यासः

(ख) विशेषोक्तिः   असङ्गतिः

(ग) विरोधः   विरोधाभासः

(घ) सहोक्तिः   विनोक्तिः

---

DO NOT WRITE ANYTHING HERE